स्नानखी विधान

॥६७॥

२+१= ३ पत्राणि।

॥ श्र

सुमनवी विधान प-२

श्लो० ६५

नं ६७

प्रातरुत्थाय यः कश्चित्कुर्याद्धोमं दिने दिने जपापुष्पै राज्ययुक्तैरष्टोत्तर
शतं प्रिये षण्मासस्य प्रयोगेन भवेदाकर्षणं ध्रुवं ॥ देवगंधर्वकन्याश्च नागकन्या
हठादालिंगयंति तं ॥ तिलपायससमिश्रहोमात् महाविद्याम् आप्नोति ॥ इयं
देवी महादेवि वामाचारफलप्रदा ॥ भोजनानंतरं चास्यै बलिं कृत्वा दिने दिने उच्छि
ष्टेन जपेन्मंत्रं शतमष्टोत्तरं प्रिये शून्यस्थाने श्मशानादिषु च बलिप्रदानतः
प्रत्यक्षा भवति ध्रुवं ॥ इत्येषा कथिता देवी सर्वपापहारिणी मंगलोच्चा
रणाद्देवि सर्वपापविवर्जिता ॥ उच्छिष्टदूषणं हित्वा सद्य सिद्धो भवेद्ध्रुवम् ॥
इति सुमुखी विधानम् ॥



॥ मूलेन मूर्तिं संकल्प्य पाद्यादीनि
न्यासेत् ॥ पुनः पंचकोणेषु ॥ चंद्रां सु
मुखीं पूजयामि १ चंद्राननां
सुमुखीं पूज० ॥२ चारुमुखीं
सुमुखीं पूज० ३ चामीकरप्रभां
सुमुखीं पूज० ४ ॐ चतुरां सुमुखीं पू
ज० ॥५॥ पुनः केशरेषु ॥ ॐ कालीं सुमु
खीं पूज० ॥१॥ ॐ कपालिनीं सुमुखीं पू
ज० ।२। ॐ कुल्लां सुमुखीं पू० ३ ॐ कुरुकु
ल्लां सुमुखीं पू० ॥४॥ ॐ विरोधिनीं सुमु
खीं पू० ॥५॥ ॐ विप्रचित्तां सुमुखीं पू० ६
ॐ उग्रां सुमुखीं पू० ॥७॥ ॐ उग्रप्रभां
सुमुखीं पू० ॥८॥ ॐ दीप्तां सुमुखीं पू० ९ ॥ ॐ नीलां सुमुखीं पू० १० ॐ घनां
सुमुखीं पू० ११ ॐ बलाकिकां सुमुखीं पू० १२ ॐ मात्रां सुमुखीं पू० १३ ॐ मुद्रां सु
मुखीं पू० १४ ॐ मितां सुमुखीं पू० १५ पुनः अष्टपत्रेषु ॥ ॐ ब्राह्मीं सुमु
खीं पू० ॥१ ॐ नारायणीं सुमुखीं पू० २ ॐ माहेश्वरीं० ३ ॐ चामुंडां० ४
ॐ कौमारीं० ५ ॐ अपराजितां० ६ ॐ वाराहीं० ७ ॐ नारसिंहीं सुमुखीं
पू० ८ ॥ पुनः षोडशारे ॥ ॐ कलां सुमुखीं पू० १ ॐ कलानिधिं सुमुखीं पू० २ ॐ कालीं
सुमुखीं पू० ३ ॐ कमलां सुमुखीं पू० ४ ॐ किशोरीं सुमुखीं पू० ५ ॐ कुमुदां सुमुखीं पू० ६
ॐ कंचां सुमुखीं पू० ७ ॐ कुलीनां सुमुखीं पू० ८ ॐ कल्याणीं सुमुखीं पू० ९ ॐ कु
मारीं सुमुखीं पू० १० ॐ कलभीषणां सुमुखीं पू० ११ ॐ करालां सुमुखीं पू० १२
ॐ क्रियाशक्तिं सुमुखीं पू० १३ ॐ कोमलां सुमुखीं पू० १४ ॐ कुलभूषणां सुमुखीं पू० १५
ॐ कल्पवृक्षां सुमुखीं पू० १६ पुनः भूपुरे ॥ ॐ भैरवीं सु० पू० १ ॐ महाभैरवीं सु० पू० २
ॐ सिंहभैरवीं सु० पू० ३ ॐ धूम्रभैरवीं सु० पू० ४ ॐ भीमोन्मत्तभैरवीं सु० पू० ५
ॐ वशीकरणभैरवीं सु० पू० ६ ॐ मोहनभैरवीं सु० पू० ७ पुनः भूपुरे ॐ इंद्रा
द्यायुधाः [illegible] ॥

ॐ श्रीगणेशाय नमः ॥ अथ गोपालस्तोत्रं लिख्यते ॥ नवीननीरदश्यामं नीलेंदीवरलोचनं ॥ वल्लवीनंदनं वंदे कृष्णं गोपालरू
पिणं ॥ स्फुरद्बर्हदलो — — नीलकुंचितमूर्द्धजं ॥ कदंबकुसुमोद्बद्धवनमालाविभूषितं ॥ गंडमंडलसंसर्गिचलत्कां
चनकुंडलं ॥ स्थूलमुक्ताफलोदारहारोद्योतितवक्षसं ॥ हेमांगदतुलाकोटिकिरीटोज्वलविग्रहं । मंदमारुतसंक्षोभव
लितांबरसंचयं ॥ रुचिरौष्ठपुटन्यस्तवंशीमधुरनिःस्वनैः ॥ लसद्गोपालिकाचेतो मोहयंतं मुहुर्मुहुः ॥ बल्लवीवदनां
२ भोजमधुपानमधुव्रतं ॥ क्षोभयंतं मनस्तासां सस्मेरापांगवीक्षणैः ॥ यौवनोद्भिन्नदेहाभिः संसक्ताभिः परस्परं ॥
विचित्रांबरभूषाभिर्गोपनारीभिरावृतं ॥ प्रभिन्नांजनकालिंदीजलकेलिकलोत्सुकं ॥ योधयंतं क्वचिद्गोपान्
व्याहरंतं गवां गणं ॥ कालिंदीजलसंसर्गिशीतलानलकंपिते ॥ कदंबपादपच्छाये स्थितं वृंदावने क्वचित् ॥
रत्नभूधरसंलग्नारत्नासनपरिग्रहं ॥ कल्पपादपमध्यस्थहेममंडपिकागतं ॥ वसंतकुसुमामोदसुर
भीकदिङ्मुखे ॥ गोवर्द्धनगिरौ रम्ये स्थितं रासरसोत्सुकं ॥ सव्यहस्ततलन्यस्तगिरिवर्यातपत्रकं ॥ खंडिता
खंडलोन्मुक्तमुक्तासारघनाघनं ॥ वेणुवाद्यमहोल्लासकृतहुंकारनिःस्वनैः ॥ सवत्सैरुन्मुखैः शश्वद्गोकुले
रभिवीक्षितं ॥ कृष्णमेवानुगायद्भिस्तच्चेष्टावशवर्तिभिः ॥ दंडपाशोद्यतकरैर्गोपालैरुपशोभितं ॥ नार
दाद्यैर्मुनिश्रेष्ठैर्वेदवे[...]रगैः ॥ प्रीतिसुस्निग्धया वाचा स्तूयमानं परात्परं ॥ य एवं चिंतयेद्देवं भक्त्या
संस्तौति मानः [...]तुष्टोसौ [...]दाति वरमीप्सितं ॥ राजवल्लभतामेति भवेत्सर्वजनप्रियः ॥ अच
लां श्रियमा[...]
[...]मी तंत्रे गोपालस्तवराजः समाप्तः ॥ शुभम् ॥ श्री ॥

जन्मभं वृषा[illegible] कस्सौर्ये पृथिव्यां हि त्रिशोषके यं चाब्धि शेषपाताले यत्र तिष्ठति नीरपतिः
तत्राध्ययनकु[illegible] पुत्रे स्तु ॥११॥



॥ श्रीः ॥ (८)

ॐ श्रीगणेशाय नमः ॥ दद्यादुच्छिष्टशब्दं तु तथा चांडालिनीति च सुमु
खी च ततो देवी कीर्तयेत्तदनंतरं महापिशाचिनी प्रोक्ता लज्जाबीजम
तः परं नादबिंदुसमायुक्तं ठकारत्रितयं ततः सविसर्गं महादेवि
सर्वसिद्धिप्रदायकं ॥ आद्यादिपदे च काद्रस्वरूप ॥
मंत्रः ॥ उच्छिष्टचांडालि सुमुखि देवि महापिशाचिनि ह्रीं ठः ठः ठः ॥
॥२२॥ भैरव ऋषिः गायत्री छंदः सुमुखी देवता ॥ मुनिराम
द्विपद्चंद्रवन्ह्यवैरंगकं मनोः ॥ विन्यस्य सुमुखीं ध्यायेद्रक्तचित्तां
बुजस्थितां ॥ गुंजानिर्मितहारभूषितकुचां सद्यौवनोल्लासिनीं हस्ता
भ्यां न्द्दैकपालखड्गलतिके रम्यमुदा बिभ्रती रक्तालंकृतिवस्त्रले
पनलसद्देहप्रभां ध्यायतां न्द्रणां श्रीसुमुखीं शवासनगतां स्युः स
र्वदा संपदः ॥ लक्षमेकं जपेन्मंत्रं दशांशं किंशुकोद्भवैः पुष्पैः समिद्भि
र्वापि जुहुयान्मंत्रसिद्धये ॥ कालीपीठं यजेद्देवीं पंचकोणलक्षकर्णिके अ
ष्टपत्रे षोडशारे त्रिभूपुरसंवृते । मूलेन मूर्तिं संकल्प्य पाद्यादीनि प्रकल्पयेत्
वंशा चंद्राननां चारुमुखीं चामीकरप्रभां चतुरां पंचकोणेषु केशरे वंगदेवताः
ब्राह्म्याद्या अष्टपत्रेषु षोडशारे कलादिकाः कला कलानिधि काली कमला
च क्रिया कृपा कुला कुलीना कल्याणी कुमारी कलभीषणी कराला व्याधि
शारी च कोमला कुलभूषणा कल्पदा भूपुरे शक्या इंद्राद्या हेतयोपि च इत्थं
जपादिभिः सिद्धे मनोः काम्यानि साधयेत् । भुक्तोदनमनाचम्य जपेन्मंत्रमनन्य
धीः उच्छिष्टोयुतमेकं यः स भवेत्संपदास्पदं ॥ उच्छिष्टेनैव भक्तेन बलिं दद्यात्त्रि
रंतरं ॥ दध्ना भक्तैः प्रजुहुयात्समस्तं सिद्धार्थतंडुलैः राजानो मंत्रिणस्तस्य भवं
ति वशगाः तृणवत् शास्त्राणि वशगानि स्युर्हुत्वा मार्जारमांसतः धनार्थी छाग
मांसेन विद्याप्राप्तिं क्षपायसैः ॥ मधुपायससंयुक्तं स्त्रीरजोयुक्तवा सदा होम
माचरतो पुंसो जनता वशवर्तिनी मधुसर्पियुक्तेनैव गवली पत्रैर्महाप्रियः सद्यो
निहतमार्जारमांसेन मधुसर्पिषा युक्तेनोत्थजकेशाद्यैर्हुत्वैराकर्षयेत्स्त्रियः मधुयु
क्तशशमांसेन तत्फलं विद्यया सह ॥ उन्मत्ततरुभिः क्षीरप्रचितोग्नौ जुहुयाद्बुधः
कोकिलाकाक्योर्मेजीमारयेदचिराद्रिपून् वासैस्तु लूकयोः पत्रैर्होमाद्विद्वेषये
दरीन् गर्भपातसगर्भाणां मत्कुकुरवैर्भवेत् (४) आज्याक्तैर्बिल्वपत्रैर्यो मासमे
कं सहस्रैकं प्रत्यहं जुहुयात्तेन वंध्यापि लभते सुतं ॥ सौभाग्यार्थं दुर्भगाया वंधूक
कुसुमैर्नवैः मधुराक्तैः प्रजुहुयात्स्त्रीणां माकृष्टयोषितैः ॥ निर्जने मदने राण्प
प्रेतावासे चतुःपथे बलिं दत्वा प्रजपता सहस्रं चाष्टसंयुतं ॥ उच्छिष्टस्य च सा देवि
वश्यदात्री जायते चिरात् ॥ एवं गनोक्ता होमसंख्या अयुतं तत्र विनिर्दिशेत् वाममार्गे
ण सुमुखी शीघ्रं कामविधायिनी ॥ भोजनांते यथोच्छिष्टे जप्यात्सा स्वर्णसिद्धये ॥
न शीघ्रफलदा देवी सुमुखी सदृशी परा यस्या मंत्रजपाद्देवी प्रसिध्यंति मनोरथाः ॥
अपरं च प्रवक्ष्यामि भक्ष्यदेवि फलप्रदं होमसंतर्पणं चास्याः सहसा कार्यसिद्धये [illegible]
ले मंडलं कृत्वा चतुरस्रं समाहितः पूजयेन्मंडले देवीं मूलमंत्रेण मंत्रवित् तन्मा
त्रिं समाराध्य बलिरूपां प्रदर्शयेत् तां देवीं ध्यात्वा चरेद्धोमं दधिसिद्धार्थतंडुलैः सहस्रै
कविधानेन राजा भवति वश्यगः मार्जारस्य तु मांसेन योदद्यैर्होममाचरेत् संज्ञा
तो विपरीतविघ्नान् शत्रुशत्रून् वशीकृतं ॥ समधुच्छागमांसस्य सहस्रैकं धनसिद्धये ॥ विद्या
कामार्थं शर्करा घृत तथा पायसं मासात् २८ विद्यावान् ॥ रजस्वलावस्त्रेण मधुनाप्यायं
[illegible] होमात् त्रैलोक्यवशं ॥ सद्य मार्जारमांस घृत मधु चंडालकेश होमात् आकर्षणं ॥
शशकमांस मधु लोहितेन च होमात् विद्याधिकं वक्ष्यते ॥

3

॥ अथ कालिकायाः पूजायंत्रम् ॥ आदौ षट्कोणमालिख्य त्रिकोणत्रितयं तथा। वृत्तमष्टदलं बाह्ये भूपुरं तत्र पूजयेत् ॥ जया स्याद्विजया पश्चादजिता चापराजिता ॥ नित्या विलासिनी चापि दोग्ध्री घोरा च मंगला १३ पीठशक्तय एतास्तु कालिकायोगपीठतः ॥ आत्मने हृदयांतोयं मायादिः पीठमंत्रकः ॥ अस्मिन्पीठे यजेद्देवीं शवरूपशिवस्थितां ॥ महाकालरतासक्तां शिवाभिर्दिक्षु वेष्टितां ॥ १४ ॥ अंगानि पूर्वमाराध्य षट्पत्रेषु समर्चयेत् कालीं कपालिनीं कुल्लां कुरुकुल्लां विरोधिनीं १५ विप्रचित्तां च संपूज्य नवकोणेषु पूजयेत् ॥ उग्रामुग्रप्रभां दीप्तां नीलां घनां बलाकिकां १६ मात्रां मुद्रां तथा मितां पूज्याः पत्रेषु मातरः ॥ पद्मस्याष्टसु पत्रेषु ब्राह्मी नारायणी त्यपि १७ माहेश्वरी च चामुंडा कौमारी चापराजिता ॥ वाराही नारसिंही च पुनरेताश्च भूपुरे १८ भैरवीं महदाद्यांतां सिंहाद्यां धूम्रपूर्विकां ॥ भीमोन्मत्तादिकां चापि वशीकरणभैरवीं १९ मोहनाद्यां समाराध्य शक्रादीन्यायुधान्यपि ॥ एवमाराधिता काली सिद्धा भवति मंत्रिणः २० ततः प्रयोगान्कुर्वीत महाभैरवभाषितान् कालीं ध्यात्वा जपेल्लक्षं जुहुयात्तद्दशांशतः प्रसूनैः करवीरोत्थैः ... नायं गमभाषितम् ॥ २१ ॥ इति मंत्रमहोदधौ ॥ ...